# चतुर्थः पाठः | सूक्तिमौक्तिकम्

## स्मरणीय तथ्य

- नैतिक शिक्षा व्यक्ति को धर्म-अधर्म, कर्तव्य - अकर्तव्य, सत्य-असत्य आदि का बोध कराने वाली होती है।
- प्रस्तुत पाठ "सूक्तिमौक्तिकम्" ऐसी ही नैतिक-शिक्षाओं का भण्डार है। इसमें अच्छे आचरण की महिमा, प्रियवाणी की आवश्यकता, परोपकारियों का स्वभाव, मित्रता का स्वरूप, सत्संगति का प्रभाव आदि विषयों का निरूपण है। इस पाठ में प्रतिपादित शिक्षा का अनुगमन कर के जीवन को सदैव प्रकाशित किया जा सकता है।
- स्मरण रखने योग्य बात यह भी है कि खारे समुद्र में मिलने पर स्वादिष्ट जलवाली नदियों का जल भी अपेय हो जाता है अतः दुर्गुण वाले की संगति से स्वयं को दूर रखना चाहिए। "आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः। "

## बहुविकल्पात्मका: प्रश्ना:-

**1. वृत्तं केन संरक्षेत् ?**
क. आलस्येन ख. यत्नेन
ग. धावनेन घ. अक्षीणेन

**2. किम् आयाति याति च ?**
क. वित्तम् ख. वृतम्
ग. आचरणम् घ. व्यवहारम्

**3. कस्मात् क्षीणः अक्षीणः(पूर्णः) भवति ?**
क. वृत्ततः ख. वित्ततः
ग. संस्कारात् घ. आचरणात्

**4. कस्मात् तु हतो हतः ?**
क. धनात् ख. वित्ततः
ग. वस्त्रात् घ. वृत्ततः

**5. 'वृत्तं यत्नेन संरक्षेद् ---' अत्र क्रिया-पदं किमस्ति ?**
क. संरक्षेद् ख. वृत्तम्
ग. वित्तम् घ. यत्नेन

**6. 'वृत्ततः + तु' इत्यस्य सन्धि-पदं किम् ?**
क. वृत्तोतु ख. वृत्ततस्तु
ग. वृत्तात् घ. वृत्ततौस्तु

**7. 'हन् + क्त' इत्यस्य कः शब्दः निष्पन्नः ?**
क. हनतः ख. हनतु
ग. हतः घ. हनक्तः

**8. 'यत्नेन' पदे का विभक्तिः अस्ति ?**
क. तृतीया ख. पञ्चमी
ग. प्रथमा घ. षष्ठी

**9. कं श्रुत्वा अवधार्यताम् ?**
क. धर्मसर्वस्वम् ख. कथाम्
ग. गीतम् घ. कविताम्

**10. धर्मसर्वस्वं किं कुर्यात् ?**
क. दर्शनीयम् ख. श्रूयताम्
ग. अवलोकनीयम् घ. धावनीयम्

**11. 'प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः' अस्मिन् वाक्ये 'जन्तवः' इत्यस्य विशेषण-पदं किम्?**
क. तुष्यन्ति ख. प्रियवाक्यम्
ग. सर्वे घ. प्रदानेन

**12. कस्य प्रतिकूलानि परेषां न समाचरेत् ?**
क. तव ख. शत्रोः
ग. पापस्य घ. आत्मनः

**13. आत्मनः प्रतिकूलानि केषां न आचरेत् ?**
क. आत्मनः ख. येषाम्
ग. तेषाम् घ. परेषाम्

**14. 'अनुकूलानि' इत्यस्य विलोमपदम् अत्र किं प्रयुक्तम्?**
क. अनुसारम् ख. प्रतिदिनम्
ग. प्रतिकूलानि घ. अनुकार्याणि ।

**15. 'मधुरम्' इत्यस्य पर्याय - पदं किं प्रयुक्तम् ?**
क. प्रियम् ख. अप्रियम्
ग. कटुः घ. कषायः

**16. 'पशवः' इत्यस्मिन् अर्थे अत्र किं पदं प्रयुक्तम्?**
क. असुरः ख. जन्तवः
ग. मानवः घ. दानवः

**17. 'जन्तवः' इत्यस्मिन् पदे किं वचनम् ?**
क. एकवचनम् ख. बहुवचनम्
ग. द्विवचनम् घ. किमपि न

**18. 'गुणेष्वेव हि कर्तव्यः प्रयत्नः पुरुषैः सदा' अत्र `कर्तव्यः' पदं कस्मै प्रयुक्तम् ?**
क. प्रयत्नाय ख. सदा
ग. गुणेष्वेव घ. पुरुषैः

**19. 'गुणयुक्तः दरिद्रः अपि' अत्र विशेष्य-पदं किम् ?**
क. गुणः ख. अपि
ग. युक्तः घ. दरिद्रः

**20. 'पिबन्ति नद्यः स्वयमेव नाम्भः।' अत्र 'नद्यः' इति कर्तृ- पदस्य क्रियापदं किम् ?**
क. स्वयम् ख. एव
ग. पिबन्ति घ. नाम्भः

**21. जलम् (अम्भः) स्वयमेव काः न पिबन्ति?**
क. वृक्षाः ख. नद्यः
ग. प्रकृतिः घ. वारिवाहाः

**22. वृक्षाः स्वयं कानि न खादन्ति?**
क. पुष्पम् ख. फलानि
ग. मञ्जरम् घ. सस्यम्

**23. 'दरिद्रोऽपि' इत्यस्य सन्धि-विच्छेदः कः?**
क. दरिद्रः +अपि ख. दरि+ अपि
ग. दरिद्रौ+अपि घ. दरिद्र + अपि

**24. परोपकाराय केषां विभूतयः ?**
क. अधमानाम् ख. दुष्टानाम्
ग. सताम् घ. मानवानाम्

**25. वारिवाहाः किं न अदन्ति?**
क. फलम् ख. सस्यम्
ग. वृक्षम् घ. भोजनम्

**26. 'नादन्ति सस्यं खलु वारिवाहाः' अस्मिन् वाक्ये अव्यय-पदं किम् अस्ति?**
क. सस्यं ख. खलु
ग. नादन्ति घ. वारिवाहाः

**27. आरम्भगुर्वी कस्य मैत्री ?**
क. सज्जनस्य ख. मानवस्य
ग. खलस्य घ. साधोः

**28. पुरा लघ्वी पश्चात् वृद्धिमती च कस्य मैत्री ?**
क. सज्जनानाम् ख. खलानाम्
ग. असुराणाम् घ. दुष्टानाम्

**29. महीमण्डलमण्डनाय यत्र-कुत्रापि के गताः भवेयुः ?**
क. काकाः ख. कोकिलाः
ग. हंसाः घ. बकाः

**30. "येषां मरालैः सह विप्रयोगः" अस्मिन् वाक्ये 'हंसैः' इत्यर्थे कः शब्दः आगतः ?**
क. येषाम् ख. मरालैः
ग. सह घ. विप्रयोगः

**31. "गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।" इति अनुसारं गुणाः कुत्र गुणाः भवन्ति?**
क. मूर्खेषु ख. पशुषु
ग. वनस्पतिषु घ. गुणज्ञेषु

**32. के गुणज्ञेषु गुणाः भवन्ति?**
क. गुणाः ख. दुर्गुणं
ग. दोषाः घ. दुष्प्रभावः

**33. गुणाः निर्गुणं प्राप्य कीदृशाः भवन्ति?**
क. गुणाः ख. सद्गुणाः
ग. सुयोग्याः घ. दोषाः

## बहुविकल्पात्मक-प्रश्नानाम् उत्तराणि

1 ख. यत्नेन
2. क. वित्तम्
3. ख. वित्ततः
4. घ. वृत्ततः
5. क. संरक्षेद्
6. ख. वृत्ततस्तु
7. ग. हतः
8. क. तृतीया
9. क. धर्मसर्वस्वम्
10. ख. श्रूयताम्
11. ग. सर्वे
12. घ. आत्मनः
13. घ. परेषाम्
14. ग. प्रतिकूलानि
15. क. प्रियम्
16. ख. जन्तवः
17. ख. बहुवचनम्
18. क. प्रयत्नाय
19. घ. दरिद्रः
20. ग. पिबन्ति
21. ख. नद्यः
22. ख. फलानि
23 क. दरिद्रः + अपि
24. ग. सताम्
25 ख. सस्यम्
26 ख. खलु
27. ग. खलस्य
28 क. सज्जनानाम्
29. ग. हंसाः
30. ख. मरालैः
31. घ. गुणज्ञेषु
32. क. गुणाः
33. घ. दोषाः

## अतिलघूत्तरीयाः प्रश्नाः

### एकपदेन उत्तरत

1. वित्ततः क्षीणः नरः कीदृशः भवति ?
2. प्रयत्नपूर्वकं कस्य रक्षणं करणीयम् ?
3. किं श्रुत्वा अवधार्यताम् ?

4. श्रुत्वा किं कर्तव्यम् ?

5. "आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।" अत्र 'आचरणं कर्तव्यम्' इत्यस्य पर्यायः कः?

6. कुत्र दरिद्रता न भवेत् ?

7. 'सम्पन्नता' इत्यस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

8. 'वक्तव्यम्' अत्र कः प्रत्ययः ?

9. 'जन्तवः' इति कर्तृपदस्य क्रिया-पदं किम् ?

10. कस्मै सतां विभूतयः ?

11. नद्यः स्वयमेव किं न पिबन्ति ?

12. "नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः" इत्यनुसारं सस्यं के न खादन्ति ?

13. स्वयं फलानि के न खादन्ति ?

14. 'गुणेष्वेव हि कर्त्तव्यः प्रयत्नः पुरुषैः सदा' इत्यनुसारं पुरुषैः कदा प्रयत्नः कर्त्तव्यः ?

15. मरालैः सह वियोगेन केषां हानिः भवति ?

## अतिलघूत्तरीय-प्रश्नानाम् उत्तराणि

1. अक्षीणः
2. वृत्तस्य
3. धर्मसर्वस्वम्
4. अवधार्यताम्
5. समाचरेत्
6. वचने
7. दरिद्रता
8. तव्यत्
9. तुष्यन्ति
10. परोपकाराय
11. अम्भः (जलम्)
12. वारिवाहाः
13. वृक्षाः
14. सदा
15. सरोवराणाम्

## लघूत्तरीयाः प्रश्नाः

1. कीदृश्यः नद्यः प्रवहन्ति ?

2. समुद्रमासाद्य नद्यः कीदृश्यः भवन्ति ?

3. यत्नेन किं रक्षेत्, वित्तं वृत्तं वा ?

4. जन्तवः केन तुष्यन्ति ?

5. अस्माभिः (किं न समाचरेत्) कीदृशम् आचरणं न कर्तव्यम् ?

6. सज्जनानां मैत्री कीदृशी भवति ?

7. सरोवराणां हानिः कदा भवति ?

**रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत -**

8. आरम्भगुर्वी मैत्री क्रमेण <u>क्षयिणी</u> भवति ।

9. सज्जनानां <u>मैत्री</u> छायेव भवति ।

10. <u>खलानां</u> मैत्री छायेव भवति ।

11. हंसाः <u>महीमण्डलमण्डनाय</u> कुत्रापि गच्छेयुः ।

12. <u>मरालैः</u> सह विप्रयोगः सरोवराणां हानिः भवति ।

13. नद्यः <u>आस्वाद्यतोयाः</u> प्रवहन्ति ।

14. समुद्रम् आसाद्य जलम् <u>अपेयं</u> भवति ।

15. <u>गुणज्ञेषु</u> गुणाः गुणाः भवन्ति।

## लघूत्तरीयाः प्रश्नानाम् उत्तराणि

1. आस्वाद्यतोयाः नद्यः प्रवहन्ति।

2. समुद्रमासाद्य नद्यः अपेयाः भवन्ति।

3. यत्नेन वृत्तं रक्षेत्।

4. जन्तवः प्रियवाक्यप्रदानेन तुष्यन्ति ?

5. अस्माभिः आत्मनः प्रतिकूलम् आचरणं न कर्तव्यम्।

6. सज्जनानां मैत्री पुरा लघ्वी पश्चात् च वृद्धिमती भवति ।

7. मरालैः सह वियोगेन सरोवराणां हानिः भवति ।

**प्रश्ननिर्माणं-**

8. आरम्भगुर्वी मैत्री क्रमेण <u>कीदृशी</u> भवति?

9. सज्जनानां <u>का</u> छायेव भवति?

10. <u>केषां</u> मैत्री छायेव भवति?

11. हंसाः <u>किमर्थं</u> कुत्रापि गच्छेयुः?

12. <u>कैः</u> सह विप्रयोगः सरोवराणां हानिः भवति?

13. नद्यः <u>कीदृश्यः</u> प्रवहन्ति?

14. समुद्रम् आसाद्य जलं <u>कीदृशं</u> भवति?

15. <u>केषु</u> गुणाः गुणाः भवन्ति?

## दीर्घोत्तरीय-प्रश्नाः

1. 'मम प्रियः कविः' इति विषयम् आधृत्य संस्कृतभाषायाम् एकम् अनुच्छेदं लिखन्तु ।

2. भवती गरिमा। भवत्याः सखी चित्रा गायन-प्रतियोगितायां प्रथमं स्थानं प्राप्तवती । तस्यै लिखिते वर्धापनपत्रे मञ्जूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत ।

राँचीतः

दिनाङ्कः-----

प्रिय (i)--------------

सप्रेम नमोनमः ।

समाचारपत्रेण ज्ञातं यत् भवती राष्ट्रिय-गायन-प्रतियोगितायां (ii)----------------स्थानं प्राप्तवती, पठित्वा अतीव (iii)----------------- अनुभवामि। त्वया बाल्यकालात् एव (iv)-----------गृहीता नित्यं च(v)-----------------कृतः, इति अहं जानामि । अनेकाः विपरीत-परिस्थितयः अपि त्वया (vi)-------------।

अद्य तव परिश्रमस्य आत्मविश्वासस्य च विजयः अभवत्। सफलतायाः प्रथमं (vii)---------------- भवत्या आरूढम् । अस्मिन् अवसरे मम (viii)--------------- स्वीकरोतु, भविष्ये अपि एवम् एव सफला भवेत्, इयं कामना अस्ति। स्वपित्रोः सेवायां मम (ix)--------------------निवेदयतु।

भवत्याः सखी

(x)-----------------।

| |
|---|
| प्रसन्नताम्, अभ्यासः, सोपानं, प्रथमं, गरिमा, चित्रे!, अभिवादनं, सोढाः, संगीतशिक्षा, वर्धापनं |

**3. अनुच्छेदं पठित्वा अधोलिखित-प्रश्नानाम् उत्तराणि लिखत -**

“मानवः संसर्गशीलः भवति । सामाजिकः प्राणी अपि मानवसंसर्गेण विना जीवितुं न शक्नोति। सज्जनाः दुर्जनाः वा सर्वे एव सङ्गतिम् इच्छन्ति । संसर्गस्य महती आवश्यकता वैशिष्ट्यं चास्ति । संसर्गतः एव मनुष्येषु गुणाः दोषाश्च समाविशन्ति । यदा मनुष्यः कुसंगतिं करोति तदा सः दुर्जनः भवति, यदा च सत्सङ्गतिम् करोति तदा सः सज्जनः भवति । संसर्गकारणात् एव सज्जनाः दुर्जनाः भवन्ति दुर्जनाः च सज्जनाः जायन्ते । कीटः अपि सुमनसा सह सतां शिरः आरोहति। अतः अस्माभिः सदा सत्सङ्गतिः करणीया ।"

**पूर्णवाक्येन उत्तरत-**

(i) कीटः केषां शिरः आरोहति ?

(ii) मानवः कीदृशः प्राणी अस्ति?

(iii) सत्संसर्गस्य कः लाभः अस्ति?

(iv) कः मानवसंसर्गेण विना जीवितुं न शक्नोति ?

(v) "सज्जनाः दुर्जनाः वा सर्वे एव सङ्गतिम् इच्छन्ति" अत्र 'इच्छन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(vi) अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत ।

## दीर्घोत्तरीय-प्रश्नानाम् उत्तराणि

1. 'मम प्रियः कविः'

संस्कृत-साहित्य-संसारे अनेके कवयः अभवन्। यथा - वाल्मीकिः, व्यासः, भासः, कालिदासः भारविः, माघः, इत्यादयः। एषु कविषु कालिदासः मह्यम् अतीव रोचते। एषः मम प्रियः कविः अस्ति। कालिदासस्य रचना अतीव सरला भवति। उपमालङ्कारस्य प्रयोगे तु सः सिद्धहस्तः अस्ति। अनेन द्वे महाकाव्ये, द्वे गीतिकाव्ये त्रीणि नाटकानि च रचितानि। नाटकेषु 'अभिज्ञान-शाकुन्तलम्' तु सुविख्यातम् अस्ति। वस्तुतः कालिदासस्य काव्यशैली तु अनुपमा अस्ति। अत एव मम प्रियः।

2. पत्रम्

| | |
|---|---|
| (i) चित्रे | (ii) प्रथमं |
| (iii) प्रसन्नताम् | (iv) संगीतशिक्षा |
| (v) अभ्यासः | (vi) सोढाः |
| (vii) सोपानं | (viii) वर्धापनं |
| (ix) अभिवादनं | (x) गरिमा |

3. पूर्णवाक्येन उत्तरत

(i) कीटः सतां शिरः आरोहति।

(ii) मानवः सामाजिकः प्राणी अस्ति।

(iii) सत्संसर्गात् एव दुर्जनाः अपि सज्जनाः भवन्ति, इति लाभः अस्ति।

(iv) सामाजिकः प्राणी अपि मानवसंसर्गेण विना जीवितुं न शक्नोति।

(v) "सज्जनाः दुर्जनाः वा सर्वे एव सङ्गतिम् इच्छन्ति"। अत्र 'इच्छन्ति' इति क्रियापदस्य कर्तृपदं 'सज्जनाः दुर्जनाः वा' अस्ति।

(vi) अस्य अनुच्छेदस्य उचितं शीर्षकं `सत्सङ्गतिः' अस्ति ।